# Vishvakarmana Kritam Surya Stotram 23

# વિશ્વકર્મણા કૃતં સૂર્યસ્તોત્રમ્ ૨૩

## Document Information

Text title : Vishvakarmana Kritam Surya Stotram 23

File name : vishvakarmaNAkRRitaMsUryastotram23.itx

Category : navagraha, skandapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : skandapurANa | prabhAsakhaNDa | adhyAya 11/171-180||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2025

*sanskritdocuments.org*

# વિશ્વકર્મણા કૃતં સૂર્યસ્તોત્રમ્ ૨૩

ઈશ્વર ઉવાચ ।
લિખમાનસ્તતો ભાનું વિશ્વકર્મા પ્રજાપતિઃ ।
ઉદ્ભૂતપુલકઃ સ્તોત્રમિદઞ્ચક્રે વિવસ્વતઃ ॥ ૧.૧૧.૧૭॥

વિવસ્વતે પ્રણતજનાનુકમ્પિને મહાત્મને સમજવસપ્તસપ્તયે ।
સતેજસે કમલકુલાલિબન્ધવે સદા તમઃપટલપટાવપાટિને ॥ ૧૭૧॥

પાવનાતિશયસર્વચક્ષુષે નૈકકામવિષયપ્રદાયિને ।
ભાસુરામલમયૂખમાલિને સર્વભૂતહિતકારિણે નમઃ ॥ ૧૭૨॥

અજાય લોકત્રયભાવનાય ભૂતાત્મને ગોપતયે વૃષાય ।
નમો મહાકારુણિકોત્તમાય સૂર્યાય વસ્તુપ્રભવાલયાય ॥ ૧૭૩॥

વિવસ્વતે જ્ઞાનભૃતેઽન્તરાત્મને જગત્પ્રતિષ્ઠાય જગદ્ધિતૈષિણે ।
સ્વયમ્ભુવે નિર્મલલોકચક્ષુષે સુરોત્તમાયામિતતેજસે નમઃ ॥ ૧૭૪॥

ક્ષણમુદયાચલભાલિતાર્ચ્ચિઃ સુરગણગીતિગરિષ્ઠગીતઃ ।
ત્વમુત મયૂખસહસ્રવજ્જગતિ વિકાસિતપદ્મનાભઃ ॥ ૧૭૫॥

તવ તિમિરાસવપાનમદાદ્ભવતિ વિલોહિતવિગ્રહતા ।
મિહિરવિભાસતયા સુતરાં ત્રિભુવનભાવનમાત્રપરઃ ॥ ૧૭૬॥

રથમારુહ્ય સમાવયવં રુચિરવિકલિતદિવ્યહયમ્ ।
સતતમરિબલે ભગવંશ્ચરસિ જગદ્ધિતબદ્ધરસઃ ॥ ૧૭૭॥

અમૃતમયેન રસેન સમં વિબુધપિતૄનપિ તર્પ્પયસે ।
અરિગણસૂદન તેન તવ પ્રણતિમુપેત્ય લિખામિ વપુઃ ॥ ૧૭૮॥

શુભસમવર્ણમયં રચિતં તવ પદપાંસુપવિત્રતમમ્ ।
નતજનવત્સલ માં પ્રણતં ત્રિભુવનપાવન પાહિ રવે ॥ ૧૭૯॥

ઇતિ સકલજગત્પ્રસૂતિભૂતં ત્રિભુવનભાવનધામહેતુમેકમ્ ।

રવિમખિલજગત્પ્રદીપભૂતં ત્રિદશવરં પ્રણતોઽસ્મિ દેવદેવમ્ ॥ ૧.૧૧.૧૮૦॥

ઇતિ શ્રીસ્કન્દપુરાણે પ્રભાસખણ્ડે પ્રભાસક્ષેત્રમાહાત્મ્યે એકાદશાધ્યાયાન્તર્ગતં
વિશ્વકર્મા કૃતં સૂર્યસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । પ્રભાસખણ્ડ । અધ્યાય ૧૧/૧૭૧-૧૮૦॥

skandapurANa . prabhAsakhaNDa . adhyAya 11/171-180..

Proofread by PSA Easwaran

---

*Vishvakarmana Kritam Surya Stotram 23*

pdf was typeset on August 24, 2025

Please send corrections to *sanskrit@cheerful.com*